# श्रीसिद्धसरयूस्तोत्राष्टकम्

Shri Siddhasarayustotrashtakam

sanskritdocuments.org

February 19, 2019

# Shri Siddhasarayustotrashtakam

# श्रीसिद्धसरयूस्तोत्राष्टकम्

## Sanskrit Document Information

Text title : siddhasarayUstotrAShTakam

File name : siddhasarayUstotrAShTakam.itx

Category : devii, devI, nadI, aShTaka

Location : doc_devii

Author : Maheshvaranandasarasvati

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Brihat Stotra Ratnakar Shivadutta Shastri

Latest update : February 19, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

February 19, 2019

*sanskritdocuments.org*

# श्रीसिद्धसरयूस्तोत्राष्टकम्

श्रीरामनाममहिमानमुदीरयन्ती
    तद्धाम-साम-गुण-गौरवमुद्गीरन्ती ।
आपूर-पूर-परिपूत-गभीरघोषा
    दोषाटवी-विघटनं सरयूस्तनोतु ॥ १॥

श्रीभारतीय-विजय-ध्वज-शैलराज-
    प्रोड्डीयमान-कलकेतन-कीर्तिवल्ली ।
श्रीमानसोत्तरसरः-प्रभवाद्यशक्ति-
    र्मूर्ता नदीशतनुता सरयूर्विभाति ॥ २॥

साकेत-गौरवगिरः परिबृंहयन्ती
    श्रीराघवेन्द्रमभितःकिल दर्शयन्ती ।
गङ्गां भृगुप्रवरतीर्थमनुस्रवन्ती
    धन्या पुनातु सरयूर्गिरिराजकन्या ॥ ३॥

इक्ष्वाकुमुख्य-रविवंश-समर्चिताङ्घ्रि-
    र्दिव्यावदात-जलराशि-लसत्प्रवाहा ।
पापौघ -कानन‌घटा -दहनप्रभावा
    दारिद्र्य-दुःख-दमनी सरयूर्धिनोतु ॥ ४॥

त्रैलोक्यपुण्यमिव विद्रुतमेकनिष्ठं
    निस्तन्द्र-चन्द्रकिरणामृत-लोभनीयम् ।
सर्वार्थदं सकल-मङ्गल-दानदक्षं
    वन्दे प्रवाहमतुलं ललितं सरय्वाः ॥ ५॥

नित्यं समस्त-जन-तापहरं पवित्रं
    देवासुरार्चितमुदग्र -समग्रधारम् ।
हारं हरेर्हरिण-रेणुविलासकूलं
    श्रीसारवं सलिलमुद्धमुपघ्नमीडे ॥ ६॥

वन्याः सरिद्-द्रुमलता-गज-वाजि-सिंहा
हंसाः शुका हरिण-मर्कट-कोल-कीटाः ।
मत्स्या भुजङ्ग-कमठा अपि संश्रितास्त्वां
पूज्या भवन्ति जगतां महिता महार्हाः ॥ ७॥

एकादशीमथ महानवमीं भजन्तो
दिव्यावगाहनरता समुपेत्य धीराः ।
श्रीजानकीशचरणाम्बुज -दत्तचित्ता-
नावर्तयन्ति भवमत्र जले सरय्वाः ॥ ८॥

पुण्यैर्धन्यैर्वसिष्ठादिभिरथ मुनिभिः सेवितां दिव्यदेहां
गौराङ्गीं स्वर्णरत्नोज्ज्वल-पटल-लसद्-भूषणाख्यां दयार्द्राम् ।
श्रीनागेशाभिमुख्यां सुरवरझरिणीं सर्वसिद्धिप्रदात्रीं
तोष्टये ब्रह्मरूप-प्रकटित-सरयूं कोटिसूर्य-प्रकाशाम् ॥ ९॥

देव्याः सरय्वाः स्तवनं सर्वमङ्गल-मङ्गलम् ।
श्रीरामेश्वरयोः सद्यो वशीकरणमुत्तमम् ॥ १०॥

काशीपीठाधिनाथेन शङ्कराचार्यभिक्षुणा ।
महेश्वरेण रचितः स्तवोऽयं सत्सु राजताम् ॥ ११॥

इति काशीपीठाधीश्वर-जगद्गुरु शङ्कराचार्य-स्वामि-
श्रीमहेश्वरानन्दसरस्वतीविरचितं सिद्धसरयूस्तोत्राष्टकं सम्पूर्णम् ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Shri Siddhasarayustotrashtakam*
pdf was typeset on February 19, 2019

Please send corrections to *sanskrit@cheerful.com*